# Shri Nityanandasvamikrita Shrihari Prarthana

# શ્રીનિત્યાનન્દસ્વામિકૃતા શ્રીહરિપ્રાર્થના

## Document Information

Text title : Shri Nityanandasvamikrita Shrihari Prarthana

File name : nityAnandasvAmikRRitAshrIhariprArthanA.itx

Category : vishhnu, svAminArAyaNa, krishna, aShTaka

Location : doc_vishhnu

Author : nityAnandasvAmi

Acknowledge-Permission: Swaminarayan Sampradaya

Latest update : August 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 9, 2024

*sanskritdocuments.org*

# શ્રીનિત્યાનન્દસ્વામિકૃતા શ્રીહરિપ્રાર્થના

ત્વદ્રૂપસ્ય સુનિશ્ચયો મનસિ મે સર્વોત્તમઃ સ્યાત્સદા
ત્વત્સૌખ્યેન સુખી ભવેયમનિશં નૈવેતરેણ ક્વચિત્ ।
ત્વદ્ભિન્નાકૃતયશ્ચ સન્ત્વતિતરાં તુચ્છાઃ કૃતા માયયા
યાચે ત્વામિતિ સન્તતં કૃતનતિસ્તદ્દેહિ મે શ્રીહરે ॥ ૧॥

ત્વય્યેકાન્તિકભક્તિરસ્ત્વવિચલા માહાત્મ્યયુગ્ ધર્મ
પ્રત્યૂહાન્મદનાદ્યધર્મકુલતસ્તત્રાવનં મે કુરુ ।
જ્ઞાનાદૌ ચ દૃઢસ્થિતિં વૃષકુલે તસ્યાં સહાયે પરે
યાચે ત્વામિતિ સન્તતં કૃતનતિસ્તદ્દેહિ મે શ્રીહરે ॥ ૨॥

પ્રેષ્ઠાનાં તવ સઙ્ગમોઽસ્ત્વનુદિનં કાન્તિકાનાં સતાં
શુષ્કજ્ઞાન્યુપધર્મિકૌલમતિનાં સઙ્ગો ન મે સ્યાત્ ક્વચિત્ ।
ભક્તત્વે ક્વ ચ દોષલેશ ઇહ તે નૈવાવશિષ્યેત મે
યાચે ત્વામિતિ સન્તતં કૃતનતિસ્તદ્દેહિ મે શ્રીહરે ! ॥ ૩॥

દ્રોહસ્તે તવ સેવિનાં ચ મહતાં ન સ્યાદ્કદાપિ ક્વચિત્
તિષ્ઠેન્નૈવ ચ વાસનાન્યવિષયા ત્વત્સેવનાન્મે હૃદિ ।
કુર્યાં દાસ્યમહં તવાન્તિકગતો નિત્યં સતાં વાઞ્છિતં
યાચે ત્વામિતિ સન્તતં કૃતનતિસ્તદ્દેહિ મે શ્રીહરે ! ॥ ૪॥

દેહે દૈહિક આત્મતા ચ મમતા ન સ્યાદિહ ક્વાપિ મે
સા તુ સ્યાત્ત્વયિ ભક્તિધર્મતનયે ત્વદ્ભક્તિનિષ્ઠેષુ ચ ।
સ્નેહઃ સ્યાદધિકોઽક્ષરે વિલસતિ બ્રહ્માત્મનો મે ત્વયિ
યાચે ત્વામિતિ સન્તતં કૃતનતિસ્તદ્દેહિ મે શ્રીહરે ! ॥ ૫॥

વિશ્વાસસ્તવ વાચિ મેઽસ્તુ કુહુચિત્સ્યાન્નાસ્તિકત્વં ન મે
સલ્લક્ષ્માણ્યખિલાનિ સન્તુ મયિ તાન્યુક્તાનિ યાનિ ત્વયા ।
ન સ્યાન્મે ક્વચિદાસુરત્વમવ માં તદ્ધેતુલોભાદિતો
યાચે ત્વામિતિ સન્તતં કૃતનતિસ્તદ્દેહિ મે શ્રીહરે ! ॥ ૬॥

યત્કાર્યેષુ રુચિર્યથા તવ તથૈવ સ્યાદ્રુચિસ્તેષુ મે
કારુણ્યં હૃદિ વર્તતાં મમ વિભો સર્વેષુ દેહિષ્વપિ ।
ભક્તાભીષ્ટદ રક્ષણં કુરુ સદા મોહાત્ પ્રમાદાચ્ચ મે
યાચે ત્વામિતિ સન્તતં કૃતનતિસ્તદ્દેહિ મે શ્રીહરે ! ॥ ૭॥

નિત્યં ત્વદ્વપુરીક્ષણે મમ દૃશૌ સ્યાતાં ચ સત્કીર્તને
વાણી તે યશસાં કથાશ્રુતિપરૌ કર્ણૌ મનશ્ચ સ્મૃતૌ ।
સેવાયાં તવ તે સતાં ચ નિરતૌ હસ્તૌ ત્વદીયસ્ય મે
યાચે ત્વામિતિ સન્તતં કૃતનતિસ્તદ્દેહિ મે શ્રીહરે ! ॥ ૮॥

ઇતિ શ્રીનિત્યાનન્દસ્વામિકૃતા શ્રીહરિપ્રાર્થના સમ્પૂર્ણા ।

*Shri Nityanandasvamikrita Shrihari Prarthana*
pdf was typeset on August 9, 2024

Please send corrections to *sanskrit@cheerful.com*